Shri Raghunatha Temple MSS. Library,
JAMMU

No. २६३/घ

Title लघुसिद्धान्तकौमुदी

Author वरदराजः

Extent ७८ पत्र Age

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धांत

लघुकौमुदी

१७३

© Dharmartha Trust J&K. Digitized by eGangotri

विसर्जनीयानां कंठः इचुयशानां तालु ऋटुरषाणां मूर्द्धा ऌतुलसानां दंताः उपू
पध्मानीयानामोष्ठौ ञमङणनानां नासिका च एदैतोः कंठतालु ओदौतोः कंठोष्ठं वकारस्य
दंतोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासिकानुस्वारस्य अष्टौ स्थानानि वर्णानामुरः कंठः
तथा जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च हकारं पंचमैर्युक्तमंतस्थाभिश्च सं
युक्तमौरस्यं तं विजानीयात् कंठ्यमाहुरसंयुक्तं यत्नो द्विधा आभ्यंतरो बाह्यश्च आद्यः पंचधा
स्पृष्टेषत्स्पृष्टेषद्विवृत विवृतसंवृतभेदात् तत्र स्पृष्टं प्रयत्नं स्पर्शानां ईषत्स्पृष्टमंत
स्थानां ईषद्विवृतमूष्माणां विवृतं स्वराणां ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियाद
शायां तु विवृतमेव बाह्यस्त्वेकादशधा विवारः संवारः श्वासो नादो घोषो अघोषो अल्प
प्राणो महाप्राणः उदात्तो अनुदात्तः स्वरितश्चेति खरो विवाराः श्वासा अघोषाश्च हशः संवारा नादा
घोषाश्च वर्गाणां प्रथमतृतीयपंचमा यणश्चाल्पप्राणाः वर्गाणां द्वितीयचतुर्थौ शलश्च
महाप्राणाः कादयो मावसानाः स्पर्शाः यणोंतस्थाः शल ऊष्माणः अचः स्वराः ≍क ≍ख इति क
खाभ्यां प्रागर्द्धविसर्गसदृशो जिह्वामूलीयः ≍प ≍फ इति पफाभ्यां प्रागर्द्धविसर्गसदृश
उपध्मानीयः अं अः इति अचः परावनुस्वारविसर्गौ अं इत्यनुस्वारः अः इति विसर्जनीयः
अणुदित्सवर्णस्य चाप्रत्ययः अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् अत्रैवाण्
परेण णकारेण कुचुटुतुपु एते उदितः तदेवम् इ इति अष्टादशानां संज्ञा तथेकारोकारौ ऋका
रस्त्रिंशतः एवं ऌकारोऽपि एचो द्वादशानां अनुनासिकाननुनासिकभेदेन यवला द्विधा तेना
नुनासिकास्ते द्वयोर्द्वयोः संज्ञा परः सन्निकर्षः [illegible] मन्तिघ्नायितः सन्निधिः संहितास

© Dharmartha Trust J&K. Digitized by eGangotri

स्यात् हलोनंतराः संयोगः अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः सुप्तिङंतं पदं सुबंतं तिङंतं च
पदसंज्ञं स्यात् इति संज्ञाप्रकरणं इको यणचि इकः स्थाने यण् स्यात् अचि संहितायां विषये
सुधी उपास्य इति स्थिते तस्मिन्निति निर्दिष्टे पूर्वस्य सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णां
तरेणाव्यवहितस्य पूर्वस्य बोध्यं स्थानेंतरतमः प्रसंगे सति सदृशतम आदेशः स्यात् सुध्
य् उपास्य इति स्थिते अनचि च अचः परस्य यरो द्वे वा स्तो न त्वचि झलां जश् झशि संयोगां
तस्य लोपः संयोगांतं यत्पदं तस्य लोपः अलोंत्यस्य षष्ठीनिर्दिष्टोंत्यस्यादेशः स्यात् इति
प्राप्ते यणः प्रतिषेधो वाच्यः अर्द्धं नपरेण संयोज्य सुध्युपास्य मध्वरिः धात्रंशः लाकृ
ति एचोयवायावः एचः क्रमात् अय् अव् आय् आव् एते स्युरचि यथासंख्यमनुदेशः
समानां समसंबंधी विधिर्यथासंख्यं स्यात् हरये विष्णवे नायकः पावकः वांतो यि प्रत्य
ये यादौ प्रत्यये परे ओदौतो रवावौ स्तः गव्यं नाव्यं क्षय्यजय्यौ शक्यार्थे क्षय्यं जय्यं शक्या
र्थे किं क्षयार्थे किं दोयं पोयं जेयमनः अध्वपरिमाणे च गो यूतौ वांतादेशो निपात्य
ते गव्यूतिः अदेङ्गुणः अदेंच गुणसंज्ञः तपरस्तत्कालस्य तपरस्तात्परो वा उच्चार्यमा
णः समकालस्यैव संज्ञा स्यात् एकः पूर्वपरयोरित्यधिकृत्य आद्गुणः अवर्णाद
चि पूर्वपरयोरेको गुण आदेशः संहितायां उपेंद्रः गंगोदकं रमेशः इत्यादि उपदेशेजनुनासि
क् इत् उपदेशेनुनासिकोऽजित्संज्ञः स्यात् प्रतिज्ञानुनासिक्याः पाणिनीयाः लण्सूत्रस्था
वर्णेन सहोच्चार्यमाणो रेफो लयोः संज्ञा स्यात् उरण् रपरः ऋ इति त्रिंशतः संज्ञेत्युक्तेत
स्थाने यो अण् स रपरः सन्नेव प्रवर्तते कृष्णर्द्धिः तवल्कारः लोपः शाकल्यस्य अवर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

णो ख्यौ न समासे वाक्यस्य । ऋत्यकः । ऋत्परे पदान्ता अकः प्राग्वत् । ब्रह्म ऋषिः । ब्रह्मर्षिः । पद
न्ताः । किं आर्छत् । इति चुसंधि । स्तोः श्चुना श्चुः । सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकार
चवर्गौ स्तः । हरिश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात् । शात्परस्य तो न विः स्तः । प्रश्नः ।
ष्टुना ष्टुः । स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते पेष्टा तट्टीका चक्रिण्ढौकसे । न पदान्ताट्टोर
नाम् । पदान्ताट्टवर्गात्परस्य स्तोः ष्टुर्न । षट् सन्तः । षट् ते । पदात्किं । सर्पिष्टमं । अनाम्नवतिनग
रीणामिति वाच्यं षण्णां षण्णवतिः षण्णगर्यः । तोः षि । तवर्गस्य षकारे परे ष्टुत्वं न । सन्षष्ठः ।
झलां जशोऽन्ते । पदान्ते झलां जशः स्युः । वागीशः । यरोऽनुनासिकेऽनुनासिको वा । यरः पदान्त
स्यानुनासिके परे ऽनुनासिको वा स्यात् । एतन्मुरारिः । एतद्मुरारिः । प्रत्यये भाषायां
नित्यं । तन्मात्रं चिन्मयं । तोर्लि । तोर्लकारे परे परसवर्णः । तल्लयः । विद्वांल्लिखति । नस्या
नुनासिको लः । उदः स्थास्तम्भोः पूर्वस्य । उदः परयोः स्थास्तम्भोः पूर्वसवर्णः । तस्मादित्युत्त
रस्य । पंचमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण व्यवहितस्य परस्य न स्यात् । आदेः
परस्य । परस्य यद्विहितं तत्तस्यादेर्बोध्यं । अत्राघोषस्य महाप्राणस्य सस्य तादृश एव
थकारः । झरो झरि सवर्णे । हलः परस्य झरो लोपो वा सवर्णे झरि । इति सस्य थः । इति पक्षे थ
लोपः । लोपाभावपक्षे थस्य वश्रवणं न तु खरि चेति चर्त्वं प्रति तस्यासिद्धत्वात् । ख
रि च । खरि झलां चरः । स्युः । इत्युदो दस्य तः । उत्थानं उत्तम्भनं । झयो होऽन्यतरस्यां

© Dharmartha Trust J&K. Digitized by eGangotri

हयस्य पूर्वसवर्णो वा स्यात् संवारस्य नादस्य घोषस्य महाप्राणस्य हस्य तादृश एव चतुर्थः वाग्घरि
वाग्हरिः शश्छोऽटि पदान्ताज्झयः परस्य शस्य छो वा स्यादटि तच्छिवः तच्शिवः पदान्तात्किं विश्नः
छत्वममीति वाच्यं तच्छ्लोकेन तच्श्लोकेन अम्परे किं वाक्श्च्योतति मोऽनुस्वारः मान्तस्य पदस्या
नुस्वारः स्याद्धलि हरिं वन्दे पदस्येति किं गम्यते नश्चापदान्तस्य झलि नस्य मस्य चापदान्तस्य
अनुस्वारः यशांसि आक्रंस्यते झलि किं मन्यते अनुस्वारस्य ययि परसवर्णः अङ्कितः अ
ञ्चितः कुण्ठितः शान्तः गुम्फितः वा पदान्तस्य पदान्तस्यानुस्वारस्य ययि परसवर्णो वा स्यात् त्वङ्क
रोषि त्वं करोषि संय्यन्ता संयन्ता संव्वत्सरः यल्ँ्लोकं यं लोकं अत्रानुस्वारस्य पक्षेऽनुनासि
का यवलाः मो राजि समः क्वौ चेत् राजतौ परे समो मस्य म एव स्यात् सम्राट् हे मपरे वा
मपरे हकारे परे मस्य म एव वा स्यात् किम्ह्मलयत् सम्राट् हे मपरे वा मपरे किं ह्मलय
ति यवलपरे यवला वेति वक्तव्यं किंय्ह्यः किं ह्यः किंव्ँ्ह्वलयति किं ह्वलयति ल्ह्लादय
ति ल्ह्लादयति किं ह्लादयति नपरे नः नपरे हकारे परे मस्य नः स्यात् किन्ह्नुते किं ह्नुते
आद्यन्तौ टकितौ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः ङ्णोः कुक्टुक्शरि ङका
रणकारयोः कुक्टुकावागमौ स्तः शरि कुक्टुकोरसिद्धत्वात् जश्त्वं न प्राङ्क्षष्ठः प्रा
ङ्षष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः डः सि धुट् डात्परस्य सस्य धुट् वा स्यात् षट्त्सन्तः षट्स
न्तः नश्च नान्तात्परस्य धुट् वा स्यात् सन्त्सः सन्सः शि तुक् नस्य पदान्तस्य शे परे तुग्वा
वा स्यात् शश्छोऽटीति छत्वविकल्प पक्षे चतुरो रूपाणि सञ्छम्भुः सञ्च्छम्भुः सञ्च

© Dharmartha Trust J&K. Digitized by eGangotri

कुंभुः सन्नकुंभुः ङमो ह्रस्वादचि ङमुण्नित्यं ह्रस्वात्परो यो ङणनः तदंतं पदं तस्मात्परस्याचो नित्यं ङ
मुडागमः स्यात् प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युत सम सुटि समो रुः स्यात्सुटि अत्रानुनासिकात्परोनु
स्वारः अनुनासिकं विहाय परो पूर्वस्मात्परो नुस्वारागमः स्यात् खवसानयोर्विसर्जनीयः खरि
अवसाने च पदांतस्य विसर्गः संपुंकानां सो वक्तव्यः संस्कर्त्ता समस्कर्त्ता पुंसः खय्यम्परे अम्प
रे खयि पुमः पुंसस्य रुः पुंस्कोकिलः पुंस्कोकिलः प्वाजादेशेन पुंख्यानं नश्छव्यप्रशान् अम्
परे धविनांतस्य पदस्य रुः स्यात् न तु प्रशान्स्यान रुत्वस्य विसर्जनीयस्य सः खरि चक्रिंस्त्राय
स्व अप्रशान् किं प्रशान् तनोति अम्परे किं सन्त्सरुः पदांतस्य किं हंति नॄन्पे नॄनित्यस्य पे
रुः स्यात् ख्याकुप्वोः कः पौ च कवर्गपवर्गे च विसर्गस्य क्रमात् कः पौ वा स्तः जिह्वामूलीयो
पध्मानीयौ स्तः वाद्विसर्गः नॄंपाहि नॄः पाहि नॄंपाहि नॄः पाहि तस्य परमाम्रेडिते द्विरुक्तपर
मात्रे डितसंज्ञं स्यात् कांस्कान् कांस्कान् कानाम्रेडिते कान्नकारस्य रुः स्यादाम्रेडिते प
रे छे च ह्रस्वस्य छे तुक् वा आङ्माङोश्च तुक् स्यात् छे आच्छादयति माच्छिदयति माछिदत् दीर्घा
त् तुक् छे म्लेच्छति पदांताद्वा दीर्घात्पदांतात् छे परे तुक् वा लक्ष्मीच्छाया लक्ष्मीछाया शर्प्र
रुलर्निसिद्धि विसर्जनीयस्य सः पेक्षोपेवि खरि विसृष्टानाः परे विसर्जनीयः शर्परे खरि विस
र्गस्य विसर्गो नत्वन्यत् कः त्सरुः घनाघनः क्षोभणः वा शरि शरि विसर्गस्य विसर्गो वा हरिः शे
ते हरिश्शेते ससजुषो रुः पदांतस्य सस्य सजुषश्च रुः स्यात् अतो रोरप्लुतादप्लुते अप्लुतादतः प

© Dharmartha Trust J&K. Digitized by eGangotri

रस्य रो रुः स्यादप्लुतेति किं वोच्चैः । रुप्लि च अप्लुतादमः परस्य मे रुः स्याद्रुप्लि किं वो बद्यः । भो भगो अघो
अपूर्वस्य योऽशि एतत्पूर्वस्य रो यो देशोऽशि देवा इह देवायिह भोस् भगोस् अघोस् इति सांतानिपा
ता नेषां रुत्वे वा यत्वे च कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदांतयोर्वयोर्लघूच्चा
र यवौ लौ किं यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं स लघूच्चारणः ओ जेगार्ग्यस्य ओका
रात्परस्य पदांतस्य अलघुप्रयत्नस्य वस्य नित्यं लोपः भो अच्युत लघुप्रयत्नपक्षे भोयच्यु
तः पदांतस्य किं तोयं हलि सर्वेषां भो भगो अघो अपूर्वस्य यस्य लोपः स्यात् हलि भो दे
वाः भगो नमस्ते अघो याहि देवा नमस्याः रोऽसुपि अह्नो रेफादेशो न तु सुपि अहरहः अह
रोऽणः रोरि रेफस्य रेफे लोपः स्यात् ढ्लोपे पूर्वस्य दीर्घोऽणः ढकाररेफयोर्लोपनिमित्तयोः पू
र्वस्याणो दीर्घः पुनारमते अणः किं वृढः मनसरथ इत्यत्र रुत्वे कृते तेकि चेत्तु त्वेरो
रीति लोपे च प्राप्ते विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं कार्यं स्यात् इति प्राप्ते
पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वदुत्वमेव मनोरथः एतत्तदोः सुलोपोऽको
रनञ्समासे हलि अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि नञ्समासे न एषविष्णुः
स शंभुः अकोः किं एषको रुद्रः अनञ्समासे किं असः शिवः हलि किं एषोऽत्र सो
चि लोपे चेत्पादपूरणं सः इत्यस्य सो लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्यते न सेमा
मविड्ढि प्रभृतं सैष दाशरथी रामः इति विसर्गसंधि ॥ ॥ शुभं भवतु ॐ श्रीगणेशाय
नमः अर्थवदधातुरप्रत्ययः प्रातिपदिकं धातुं प्रत्ययं प्रत्ययांतं च वर्जयित्वार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

वच्छब्दरूपं प्रातिपदिकं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ समासाश्च प्रातिपदिक
संज्ञाः स्युः; सुऔजस् इति प्रथमा अम्औट्शस् इति द्वितीया टाभ्याम्भिस् इति तृतीया ङेभ्याम्भ्यस्
चतुर्थी ङसिभ्याम्भ्यस् इति पंचमी ङसोसाम् इति षष्ठी ङिओस्सुप् इति सप्तमी ङ्याप्प्राति
कात् ङ्याबन्तादात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः; अनः॥ नेवः; हलि किं एषोऽत्र लोपे चेत्पा
स इत्यस्य पदस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत सेमामविड्ढि प्रभृतिं सैष दाशरथी रामः; इति
रामः अर्थवदधातुरप्रत्ययः प्रातिपदिकं धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वार्थवच्छब्दरूपं प्रातिप
दिकं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितान्तौ समासाश्च तथा स्युः; सुऔजस् अम्औट्शस् टा
भ्याम्भ्यस् ङसिभ्याम्भ्यस् ङसोसाम् ङिओस्सुप् सप्तमी ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे
स्वादयः प्रत्ययाः स्युः; सुपः त्रीणि त्रीणि वचनान्येकश एकवचनं द्वित्वैकत्वयोर्द्विलोल;
विभक्तिवर्णानामभावो वसावेस्यात् रुत्वविसर्गौ रामः; सरूपाणामेकशेष एकविभक्तौ
कविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एवावशिष्यते रामयोः पूर्वसवर्णः; अवा; प्रथमा
द्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते नादिचि आदिचि न पूर्वसव
र्णदीर्घः; बहुषु बहुवचनं चुटू प्रत्ययाद्यौ चुटू इतौ स्तः; विभक्तिश्च सुप्तिङौ
विभक्तिसंज्ञौ स्तः; न विभक्तौ तुस्माः; विभक्तिस्थास्तवर्गसमा नेतः; इति सस्य नेत्वं रामाः ए
कवचनं संबुद्धिः बोधने प्रथमैकवचनं संबुद्धिः संज्ञं स्यात्; यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं प्रत्य
यो यस्मात् क्रियते तदादिशब्दरूपं तस्मिन्नङ्गं स्यात्; एङ्ह्रस्वात्संबुद्धेः एङन्ताद्ध्रस्वान्ताच्चाङ्गा
द्धल्लुप्यते संबुद्धेश्चेत् हे राम हे रामौ हे रामाः; अमि पूर्वः; अकोऽम्यचि पूर्वमेकादेश
रामं रामौ लशक्वतद्धिते तद्धितवर्जप्रत्ययाद्या लशकवर्गाः इतः स्युः; तस्माच्छसो नः पुंसि

© Dharmartha Trust J&K. Digitized by eGangotri

सवर्णदीर्घो त्वगोयः ; रामाः ; सललस्य तस्या स्तुसि अट्कुप्वाङ्नुम्व्यवायेपि अट्कवर्गपवर्ग ; आङ्-
नुम् एतैर्व्यस्तैर्न पदे इति प्राप्ते पदान्तस्य नस्य णो न रामान् ; अङ्-तिङ्-सुम्सिं ना त्स्या अदन्तात्
टीनामिनादयः ; स्यु ; णत्वं रामेण सुपि च यञादौ सुप्यतो गस्य दीर्घः ; रामाभ्याम् अतो भिस ऐस्
सु अनेकाल्शित्सर्वस्य रामैः ; ङेर्यः ; अतो गान्तस्य ङेर्यादेशः ; स्थानिवदादेशोऽनल्विधौ
आदेशः ; स्थानिवत्तु न तु स्थान्यलाश्रयो विधौ इति स्थानिवत्त्वात् सुपि चेति दीर्घः ; रामाय
रामाभ्यां बहुवचने झल्येत् झलादौ बहुवचने सुप्यतो गस्य एकारः ; रामेभ्यः ; सुपि किं पचध्वे
वावसाने अवसाने झलां चरो वा ; रामात् रामाद् रामाभ्यां रामेभ्यः ; रामस्य ओसि च अतो गस्य एकारः ; राम-
योः ; ह्रस्वनद्यापो नुट् ह्रस्वान्तान्नद्यन्तादावन्ताच्चांग परस्यामो नुडागमः ; नामि अजन्तांग-
स्य दीर्घः ; रामाणां रामे रामयोः ; एत्वे कृते आदेशप्रत्यययोः ; इण्कुभ्यां परस्यापदान्तस्यादे-
शस्य प्रत्ययं सस्य मूर्धन्यादेशः ; इषद्विवृतस्य तादृश एव षः ; रामेषु एवं कृष्णादयो-
दन्ताः ; सर्वादीनि सर्वनामानि सर्व विश्व उभ उभय डतर डतम् अन्य अन्यअन्यतर त्व
त् त्व नेम सम सिम् पूर्वापरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां स्व-
मज्ञातिधनाख्यायाम् अन्तरं बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक
द्वि युष्मद् अस्मद् भवतु किम् जसः शी अदन्तात्सर्वनाम्नो जसः शी अनेकाल्त्वात्सर्-
वादेशः ; सर्वे सर्वनाम्नः स्मै अतः ; सर्वनाम्नो ङे स्मै सर्वस्मै ङसिङ्योः स्मात्स्मिनौ
सर्वनाम्न एतयोरेतौ स्तः ; सर्वस्मात् आमि सर्वनाम्नः सुट् अवर्णान्तात्परस्य सर्वना-
म्नो विहितस्यामः सुडागमः ; एत्वषत्वे सर्वस्मिन् शेषं रामवत् एवं विश्वादयोप्यदन्ताः ; उभ ः

© Dharmartha Trust J&K. Digitized by eGangotri

...पया पूत्यर्थो येश्रुरु एनिर्दत्त ग्रणमिति ... ... पाकं ... मका ... त्यकजर्थः ईतरङ्ग ...
तुल्पपर्यायि सान समानामिति ज्ञापकानुपूर्वपरावरदक्षिणोत्तरापराधराणि ... द्योसम सर्वपर्याय
...या एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठान्यथैव तृया प्राप्ता ... सर्वपर्यायः
पूर्वे पूर्वाः स्वामिधेयापेक्षावधिनियमो व्यवस्था ... दक्षिणापरायराणि व्यवस्थायाम
लाइत्यर्थः स्वमज्ञातिधनाख्यायां ज्ञातिधनान्यवाचिन वाचिनः स्वशब्दस्य प्राप्ता ... जसिवा
सिवा स्वेस्वाः आत्मीया आत्मान इति वा ज्ञातिधनावाचिनं स्वे स्वाः ज्ञातयो धना वा अन्त
रवहिर्योगोपसंव्यानयोः वाह्योपसंव्यानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा अन्त
रे अन्तरा वा गृहाः वाह्या इत्यर्थः अन्तरे अन्तरा वा शाटकाः परिधानीया इत्यर्थः अन्त
दिभ्यो नवभ्यो वा एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः पूर्वस्मात् पूर्वे एवं परादीनां शेषं
सर्ववत् प्रथमचरमतयाल्पार्धकतिपयनेमाश्च एते जसि संज्ञा वा स्युः प्रथमे प्रथमाः शेषं
यत्यय द्वितये द्वितीया शेषं नामवत् नेमे नेमाः शेषं सर्ववत् तीयस्य ङित्सु
वा द्वितीयस्मै द्वितीयाय इत्यादि एवं तृतीयः तिर्जसि जरायाः जरसन्यतरस्या
मायां जरसजादौ विभक्तौ पदाधिकारे तस्य च तदन्तस्य च निर्दिष्टस्य मानस्यादेशा ज
वन्ति एकदेशविकृतानुमनन्यवदिति जरशब्दस्य जरस् निर्जरसौ निर्जरसः इत्यादि
पंचेस्तलादौ च नामवत् विश्वपाः दीर्घज्जसि च दीर्घाज्जसि इचि च न पूर्वसवर्णदीर्घ
वृद्धिः विश्वपौ विश्वपाः हे विश्वपाः विश्वपौ ... स्यादि पंचवचनानि सर्व
नामस्थानसंज्ञानि स्युः अक्लीबस्य स्यादिपंच सर्वनामस्थाने कप्रत्ययावधिषु स्यादि
षु सर्वनामस्थानेषु पूर्वं पदं स्यात् ... यादिषु जादिषु च कप्रत्ययावधिषु स्यादि
दिषु सर्वनामस्थानेषु पूर्वं भं स्यात् अाकीडादेकारान्तादूर्ध्वं कडारा मं स्यानेषु पू

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मधारयद्वन्द्वत्वात्; प्रागेकस्यैकैव संज्ञा ज्ञेया या परानवकाशा च आतो धातोः आका
रान्तो यो धातुस्तदन्तस्य भस्यांगस्य लोपः; अतोऽनस्य विश्वपः; विश्वपौ विश्वपाभ्यामित्या
दि एवं शंखध्मादयः; घेर्ङिति; हरिः हरी जसि च ह्रस्वान्तस्यांगस्य गुणः; हरयः; ह्र
स्वस्य गुणः; संबुद्धौ हे हरे हरिं हरी हरीन् शसो नः पुंसि इति सस्य नत्वे ह्रस्वो यादि
तो नदन्तस्य सखिवर्जं घिसंज्ञं आङो नाऽस्त्रियां घेः परस्याङो नास्यादस्त्रियां आङिति टासंज्ञा
हरिणा हरिभ्यां ३ हरिभिः घेर्ङिति घिसंज्ञस्य ङित्सु पि गुणः हरये हरिभ्यः २ गुणे
कृते ङसिङसोश्च एङो ङसिङसोरिति पूर्वमेकादेशः; हरेः २ हर्योः; हरीणां अच्च घेः इदु
द्भ्यामुत्तरस्य ङेरौत् घेरन्तु हरौ हरिषु एवं कव्यादयः; अनङ् सौ सख्युरंगस्यानङादे
6 शः संबुद्धौ सर्वनामस्थाने चासंबुद्धौ नान्तस्योपधाया दीर्घो संबुद्धौ सर्वनामस्थाने अ
सो संबुद्धौ सो सर्वनामस्थाने चासंबुद्धौ नान्तस्योपधाया दीर्घो यो ऽयं अन्तादेशो वर्ण
पूर्वस्य एकान्तत्वात्; हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् नलोपः प्रातिपदिकान्तस्य लुप्ते च निमित्ते कार्यं
तिसौ त्वे नदप्रत्ययलक्षणं लुलुप्यते प्रत्ययलोपे प्रत्ययलक्षणं प्रत्यये लुप्ते चिन्तदाश्रितं कार्यं
स्यान् नलोपः प्रातिपदिकान्तस्य प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः; सख
सख्युरसंबुद्धौ सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् अचो ञ्णिति अ
जन्तांगस्य वृद्धिः ञिति णिति च सखायौ सखायः; हे सखे सखायं सखायौ सखीन्
समसख्ये ख्यत्यात्परस्य खितिनीभ्यां ... ङसिङसोः परस्य ङ
सख्युः ... सख्यौ ... शेषं हरिवत् पतिः समास
सिङः सोरज्ञः सख्युः २ ... परस्य ङे डौत् सख्यौ शेषं हरिवत् पतिः समासे
एव घिसंज्ञः; पत्या पत्ये पत्युः २ पत्यौ शेषं हरिवत् समासे तु भूपतये कति वे कुवत्
नात्; बहुगणवतुडति संख्या डति च डत्यन्ता संख्यावत् संज्ञा स्यात् षड्भ्यो लुक् जश्श
स्त्यन्तयस्य लुक् ... लुप्ते ... मित्रं ... बहुसंज्ञं ...
© Dharmartha Trust J&K. Digitized by eGangotri

सरूपाः यदादीनाम; एषाम् अकारो विभक्तौ द्विपर्यन्तानामेवेष्टिः द्वौ २ द्वाः २ द्वयोः २ पातिलोकमिति पपीः स्त्रर्णः पप्यौ पप्यः हेपपी पपी पप्यौ पपीन पप्या पपीभ्यां २ पपीभिः पप्ये पपीभ्यः २ पप्याः २ पप्योः २ पप्यां पपी पपेषु एवं वातप्रम्यादयः बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी गृहीत्वा ङ्योन्तदी इदूदन्तो नित्यस्त्रीलिङ्गो नदीसंज्ञो स्यात् प्रथमलिङ्ग्रहणाच्च पूर्वस्त्रीत्वस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः अम्बार्थनद्योर्ह्रस्वः हे बहुश्रेयसि आण्नद्याः नद्यन्तात्परेषां ङितामाडागमः आटश्च आटोचि वृद्धिरेकादेशः बहुश्रेयस्यै बहुश्रेयस्याः बहुश्रेयसीनां ङेराम्नद्याम्नीभ्यः बहुश्रेयस्यां शेषं पपीवत् अतिलक्ष्मीः शेषं बहुश्रेयसीवत् प्रधीः अचि श्नुधातुभ्रुवां य्वोरियङुवङौ श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोर्भ्रूरित्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये इति प्राप्ते एरनेकाचोऽसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये प्रध्यौ प्रध्यः प्रध्यं प्रध्यि शेषं पपीवत् एवं ग्रामणीः ङेराम्नद्याम्नीभ्यः ग्रामण्यां गतिश्च प्रादयः क्रियायोगे गतिसंज्ञाः स्युः गतिकारकेतरपूर्वपदस्य यण् नेष्यते शुद्धधियौ नभूसुधियोः एतयोरचि सुपि यण् न सुधियौ सुधिय इत्यादि सुखमिच्छतीति सुखीः सुख्यौ २ सुतमिच्छतीति सुती सुत्युः २ शेषं प्रधीवत् शंभुर्हरिवत् एवं भान्वादयः तृज्वत्क्रोष्टुः असंबुद्धौ सर्वनामस्थाने क्रोष्टुरित्यस्य क्रोष्टृपर्यायो वक्तव्य इत्यर्थः ऋतो ङिसर्वनामस्थानयोः ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च इति प्राप्ते ऋदुशनस्पुरुदंसोऽनेहसां च ऋदन्तानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां अवादीनामुपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून् विभाषा तृतीयादिष्वचि तृतीयादिष्वजादिषु क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा क्रोष्ट्रे

© Dharmartha Trust J&K. Digitized by eGangotri

ऋत उत् ऋतो ङसि ङसोरति उदेकादेशः रपरः सत्सस्य रेफात्संयोगांतस्य सस्यैव लोपो नान्यस्य । र
स्य ङि सु क्रोष्टुः २ क्रोष्टरि पदे फलादौ च पूर्वं भुवत् हूहूः हूहौ इत्यादि अतिचम्वाः २ अतिचम्वा
अतिचम्वा खलपूः आमपि धात्ववयवसंयोगपूर्वो न भवति यत्र वर्णास्तदंतो यो धातुस्तदंतस्य
निकाचोगस्य यणस्यादचि सुपि खलप्वः खलप्वौ एवं सुल्वादयः स्वभूः स्वभुवौ स्वभुवः एवं
स्वयंभूः शब्दः वर्षाभूः वर्षाभ्वश्च अस्य यण् स्यादचि सुपि वर्षाभ्वौ इत्यादि दृन्भूः दृन्कार
पुनः पूर्वस्य भुवो यण् वक्तव्यः दृन्भ्वौ दृन्भ्वः एवं करभूः पुनर्भूः दृन्भू कारभू शब्दाभ्यां भुवत् धा
ता हे धातः धातारौ धातारः ऋवर्णान्तस्य णत्वं वाच्यं धातॄणां एवं नप्त्रादयः नप्त्रादिग्रहणं
व्युत्पत्तिपक्षे नियमार्थं नेनै हेन पिता पितरौ पितरः पितरं शेषं धा अ जा घ तेषां धातृव
८ त् एवं जामात्रादयः ना नरौ नरः नृ च अस्य नामि वा दीर्घः नृणां नॄणां गोतो णित्
ओकाराद्विहितं सर्वनामस्थानं णिद्वत् गौः गावौ गावः औतोऽम्शसोः ओतोऽम्शसो
राकार एकादेशः गां गावौ गाः रायो हलि अस्याकारादेशो हलि विभक्तौ राः रायौ रायः
राभ्यामित्यादि ग्लौः ग्लावौ ग्लावः ग्लौभ्यामित्यादि इत्यजन्ताः पुंलिङ्गाः रमा अपः आ
बंतादंगादौङ शी औङ इत्यौकारविभक्तेः संज्ञा रमे २ रमाः २ रमां संबुद्धौ च आप एका
रः हे रमे २ हे रमाः आङि चापः आङि ओसि चापर एकारः रमया रमाभ्यां ३ रमाभिः
याडापः आपः परस्य ङितो याट् वृद्धिः रमायै रमाभ्यः २ रमायाः २ रमयोः २ रमाणां
रमायां रमासु एवं दुर्गांबिकादयः सर्वनाम्नः स्याड्ढ्रस्वश्च आवंतात्सर्वनाम्नो ङितः स्या
ट्प्रत्ययश्च ह्रस्वः सर्वस्यै सर्वस्याः २ सर्वासां सर्वस्यां शेषं रमावत् एवं विश्वादयः आवंताः
विभाषादिक्समासे बहुव्रीहौ सर्वनामता वा उत्तरपूर्वस्यै उत्तरपूर्वायै तीयस्य ङित्सु वा सं
ज्ञा द्वितीयस्यै द्वितीयायै एवं तृतीया अम्बार्थ नद्योर्ह्रस्वः हे अम्ब हे अक्क हे अल्ल जेरा

© Dharmartha Trust J&K. Digitized by eGangotri

जरसौ जरसः इत्यादि पक्षे रमावत् गोपा विश्वपावत् मतिः मती मत्या ङिति ह्रस्वश्च इय
ङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदी
संज्ञौ स्तो ङिति मत्यै मतये मत्याः मतेः २ इदुद्भ्यां नदीसंज्ञाभ्यामिदुद्भ्यां परस्य ङेराम्
मत्याम् मतौ शेषं हरिवत् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोस्त्रिवि
भक्तौ अचि र ऋतः तिसृचतस्रोः ऋकारस्य रेफादेशः स्यादचि गुणदीर्घोत्वानामपवादः तिस्रः तिसृ
भिः तिसृभ्यः २ आमि नुट् न तिसृचतसृ एतयोर्नामि दीर्घो न तिसृणाम् तिसृषु द्वे २ द्वाभ्यां
२ द्वयोः २ गौरी गौर्यौ गौर्यः हे गौरि हे गौर्यौ इत्यादि एवं नद्यादयः लक्ष्मीः शेषं गौरीव
त् एवं तरीतन्त्र्यादयः स्त्री हे स्त्रि स्त्रियाः स्त्रियेय इयङ् स्यादजादौ प्रत्यये स्त्रियौ स्त्रियः वाम्शसोः
स्त्रियाः इयङ् स्त्रियं स्त्रीं स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियाः २ परत्वान्नुट् स्त्रीणां
स्त्रीषु श्रीः श्रियौ श्रियः नेयङुवङ्स्थानावस्त्री इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसं
ज्ञौ न स्तो न तु स्त्री हे श्रीः अमि शसि च परत्वादियङ् श्रियं श्रियः श्रियै श्रिये श्रियाः
२ श्रियः २ इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री श्रीणां श्रियां
श्रियां श्रियि धेनुर्मतिवत् स्त्रियाञ्च स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते ऋन्नेभ्यो ङीप्
ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् क्रोष्ट्री गौरीवत् भ्रूः श्रीवत् स्वयम्भूः पुंवत् न षट्स्वस्रादिभ्यः
एभ्यो ङीप्टापौ न स्तः स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा याता मातेति सप्तैते
स्वस्रादय उदाहृताः स्वसा स्वसारौ माता पितृवत् शसि मातॄः द्यौर्गोवत् राः पुंवत् नौर्ग्लौ
वत् इत्यजन्ताः स्त्रीलिङ्गाः अतोम् अतोङ्गात् क्लीबात् स्वमोरम् ज्ञानं एङ्ह्रस्वादिति हल्लोपः हे
ज्ञान नपुंसकाच्च क्लीबात् औङः शी भसंज्ञायां यस्येति च ईकारे तद्धिते च भस्य इवर्णावर्णयोर्लोपः
इत्यलोपे प्राप्ते अविभक्तिर्यं निर्देशः औङः शीरूपं प्रतिषेधः ज्ञाने जश्शसोः शिः क्लीबात् सर्व

© Dharmartha Trust J&K. Digitized by eGangotri

नामस्थानं नपुंसकस्य झलचः। झलं तस्य जंतस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने मिदचो
ऽन्त्यात्परः। अचां मध्ये योऽन्त्यस्तस्मात्परः स्यैवा नाव्ययवोर्मिः स्यात्। उपधादीर्घः। ज्ञानानि पु
नरपि तद्वत्। शेषं रामवत्। एवं धनफलादयः। अद्ड्डतरादिभ्यः। पंचभ्यः। एभ्यः। क्लीबेभ्यः।
स्वमोरदड्डादेशः। टेः। डितिभस्य टेर्लोपः। कतरत्। कतरद्। कतरे। कतराणि। हे कतरत्। शे
षं पुंवत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य तु अन्यतममित्येव। एकत
रात्प्रतिषेधः। एकतरं। ह्रस्वो नपुंसके प्रातिपदिकस्य। अजंतस्येत्यपि पुंज्ञानवत्। स्वमोर्नपुंसकात्।
लुक् स्यात्। वारि। इकोचि विभक्तौ। इगंतस्य क्लीबस्य नुम् अचि विभक्तौ। वारिणी। वारीणि। न
लुमतेत्यस्यानित्यत्वात् पक्षे संबुद्धिनिमित्तो गुणः। हे वारे। हे वारि। आङोऽनाऽस्त्रियां प्राप्त
८ वृश्चोत्तरत्वात् नाभावात् वारिणा। वारिणे। वारिणः। २ वारिणोः। २ नुमचिरेति नुट्। वारीणां वा
रिणि। हलादौ हरिवत्। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य। वृत्तिनिमित्तैक्ये भाषितपुंस्कं
इगंतं क्लीबं पुंवद्वा टादावचि। अनादये अनादिने इत्यादि। शेषं वारिवत्। यन्निमित्त
मुपादाय पुंसि शब्दः प्रवर्तते क्लीबवृत्तित्वे तदेव स्याद्धि तत्पुंस्कं तदुच्यते। पीलुर्वृक्ष
स्तत्फलं पीलु तस्मै पीलुने अत्र न पुंवत् प्रवृत्तिनिमित्तभेदात्। अस्थिदधिसक्थ्यक्ष्णामनङ्
उदात्तः। टादावचि एषामनङ्। अल्लोपोऽनः। अंगावयवोऽसर्वनामस्थानयजादिस्वादिप
रो योऽन् तस्याकारस्य लोपः। दध्ना दध्ने दध्नः। २ दध्नोः। २ विभाषा ङिश्योः। अंगावय
वो जादिप्रत्ययपरो योऽन् तस्याकारस्य लोपो वा ङिश्योः। दध्नि दधनि। शेषं वारि
वत्। एवमस्थिसक्थ्यक्षि। सुधि सुधिनी सुधीनि हे सुधि हे सुधे सुधिने। मधु मधुनी
मधू मधुनी मधूनि हे मधु हे मधो एवं घादयः। सुलु सुलुनी सुलूनि सुलुनेत्यादि
धातृ धातृणी धातॄणि हे धातः। हे धातृ। एवं ज्ञातृ ...त्रोदयः। ग्लौः स्वादेशे

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं सं तस्य चाधातोः अत्वं तस्योपधाया दीर्घो धातुभिन्नात् सं तस्य चाप्तं वुधो सौ परं नित्यं च नुमं वा
धित्व वचनसामर्थ्याद् दादौ दीर्घ धीमान् धीमंतौ हे धीमन् अस्मादौ मरुद्वत् भातेर्डवतुप् डित्व
सामर्थ्यादेस्य टिलोपः भवान् भवंतौ अत्रेतस्य नु भवन् उभे भ्रस्तं षाष्ठद्वित्वप्रकरणे
ये द्वित्व इति ते उभे समुदिते अभ्यस्तसंज्ञे स्तः नाभ्यस्ताछ्तुः अभ्यस्ताछ्तु नुं न्ति ददत् ददं
तौ जक्षित्यादयः षट् षट् धातवोन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः जक्षत् जक्षतौ
एवं जाग्रत् दरिद्रत् शासत् चकासत् दीध्यत् वेव्यत् गुप् गुपौ गुपः गुब्भ्यां त्यदादिषु दृ
शो नालोचने कञ्च त्यदादिषु उपपदेषु अज्ञाने दृशः कञ् चात् क्विन् आ सर्वनाम्नः स
र्वनाम्नः आकारो ताद्दृग्दृशवतुषु परेषु क्वत्वस्यासिद्धत्वात् व्रश्चेतियत्नस्य जश्त्वे नट् न
स्य कुत्वे नग् तस्य चात्वेन पदे कः ताद्दृक् ताद्दृशौ ताद्दृशः ताद्दृग्भ्यां व्रश्चेति यः जश्त्वं चर्त्वे वि
ट् विड् विशौ विशः विड्भ्यां नशो वा नशः कवर्गो ताद्दृशो वा पदांते नक् नट् नशौ २ नशः
नेभ्यां नशां स्पृशो नुदके क्विन् अनुदके सुप्युपपदे स्पृशः क्विन् धृतस्य कु घतस्पृशौ घृ
तस्पृशः दधृक् दधृषौ दधृषः दधृग्भ्यां रत्नमुट् रत्नमुषौ रत्नमुषः रत्नमुड्भ्यां षट् २
षड्भिः षड्भ्यः २ षण्णां षट्सु रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रुरिति सत्वं वोरुपधा
या दीर्घ इकः रेफवांतस्य धातोरुपधाया इको दीर्घः पदांते पिपठीः पिपठिषौ पिपठि
षः पिपठीर्भ्यां नुम्विसर्जनीयशर्व्यवायेपि एतैः प्रत्येकं व्यवधानेपि इणकुभ्यां परस्य
सस्य मूर्द्धन्यादेशः षुत्वेन पूर्वस्य षः पिपठीष्षु चिकीः चिकीर्षौ चिकीर्षु विद्वान् विद्वां
सौ हे विद्वन् वसोः संप्रसारणं वस्वंतस्य भस्य संप्रसारणं स्यात् विदुषः वसुस्रंसु ध्वंसु अनडुहां द
त्व विद्वद्भ्यामित्यादि पुंसोसुङ् सर्वनामस्थाने पुमान् हे पुमन् पुमांसौ पुंसः पुंभ्यां पुंसु अदसो
डु ऊने त्यानङ् उशना उशनसौ अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः हे उशन् हे

© Dharmartha Trust J&K. Digitized by eGangotri

उपानन्‌ हउपानोभ्यां अनेहा हेअनेहः अनेहसः वेधा वेधसौ हेवेधः वेदोभ्यां अदसऔसलोपश्च
अदसऔ नु स्यात्‌ सौसुलोपश्चत्यदोरिति सः असौ त्यादाद्यत्वे पररूपत्वे च वृद्धिः अदसो
सेर्दादुदोमः अदसोसान्तस्य दात्परस्य उदूतौ लोदस्य मश्च आन्तरतम्याद्ध्रस्वस्य उकारः
दीर्घस्य ऊः अमू जसः शीगुणः एत ईद्बहुवचनस्य अदसोदात्परस्यैत ईद्दस्य च मो च कार्यौ
ञौ अमी पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक्पश्चादुत्वमत्वे अमुं अमू अमून्‌ मुत्वे
कृतेपि संज्ञायां नाभावः नमुने नाभावेकर्त्तव्ये कृतेच इति हलन्तापुंलिंगाः मुमावो नासि
द्धः स्यात्‌ अमुष्य अमुयोः अमीषां अमुष्मिन्‌ अमीषु इतिहलन्तापुंलिंगाः नहोधः नहि
पर्यान्तेच महिवृत्तिवृषिव्याधिरुचिसहितनिषु क्वौ क्विबन्तेषु पूर्वस्य दीर्घः उपान
१२ न्‌ उपानहौ उपानत्सु क्विबन्तत्वात्कुत्वेनद्यः उष्णिन्‌ उष्णिग्‌ उष्णिग्भ्यां द्योः दिवौ दिवः
13 द्युभ्यां गीः गिरौ गीर्भिः एवंपूः चतस्रः २ चतसृणां काके काः सर्वावत्‌ यः सौ इदमो
दस्य यः स्यात्‌ सौ इदमोमः त्यदाद्यत्वे टापूदश्चेति मः इमे इमः इमां अनया
हलि लोप आभ्यां आभिः अस्यै अस्याः २ अनयोः २ आसां अस्यां आसु स्रक्‌ स्रजौ स्र
ग्भ्यां त्यादाद्यः त्वे टापूदश्चेति मः इमे इमः इमां अनया हलि लोप आभ्यां आभिः अस्यै
अस्याः २ अनयोः २ आसां अस्यां आसु स्रक्‌ स्रजौ स्रग्भ्यां त्यादाद्यः त्वे टापू स्या त्ये त्योः
एवंतद्यद्‌ एतद्वाक्‌ वाचौ वाग्भ्यां अप्‌ शब्दो बहुवचनान्तः अप्तृन्निति दीर्घः आ
पः अपः अपोभिः अपस्तकारो भादौ प्रत्यये अद्भिः अद्भ्यः २ अपां अप्सु दिक्‌ दिग्‌ दि
शौ दिशः दिग्भ्यां त्यदादिष्विति किन्‌ विधानादन्यत्रापि कुत्वं दृक्‌ दृशौ २ दृग्भ्यां २ त्विट्‌ त्वि
षौ २ त्विड्भ्यां २ ससजुषो रुरिति रुत्वे सजूः सजुषौ २ सजूर्भ्यां २ आशीः आशीर्भ्यां २

© Dharmartha Trust J&K. Digitized by eGangotri

असौ उत्वमत्वे अमू: अमूं अमू अमू: अमुया अमूभ्यां ३ अमूभिः अमुष्यै अमूभ्यः २ अमुष्याः
२ अमुयोः २ अमूषां अमूष्यां अमूषु इति हलंतास्त्रीलिंगाः स्वमोर्लुक् दात्वं स्वनडुत् स्वनडुही
चतुरनडुहोरित्याम् स्वनड्वांहि पुनस्तद्वत् शेषं पुंवत् वाः वारी वारि वार्भ्यां ३ च
त्वारि २ किं के कानि इदं इमे इमानि अन्वादेशे नपुंसके एनद्वक्तव्यः एनत् एने ए
नानि एतेन एनयोः २ ब्रह्म संबुद्धौ नपुंसकानां नलोपो वा वाच्यः हे ब्रह्म हे ब्रह्मन् ब्र
ह्मणी ब्रह्माणि अहः विभाषा ङिश्योः अह्नी अहनी अहानि अहन् अहानि इत्यस्मात् रुः
पदांते अहोभ्यां ३ दंडि दंडिनी दंडीनि सुपथि टिलोपः सुपथी सुपन्थानि ऊर्क् ऊर्जी
ऊर्ज्जि नरजानां संयोगः त्यत् त्ये त्यानि तत् ते तानि यत् ये यानि एतत् एते एतानि
गवाक् गोची गवांचि पुनस्तद्वत् गोचा गवाग्भ्यां ३ शकृत् शकृती ददत् ददती वा
नपुंसकस्य अभ्यस्तात् शीवा त्वरस्य नुम् तु नुम्वा स्यात् सर्वनामस्थाने ददंति दद
ति उदत् आच्छीनद्योर्नुम् आत्परोऽयं शतृप्रत्ययवस्त्वदंतस्य नुम्वा शीनद्योः तुदंती
तुदती तुदंति भात् भांती भाती भांति पचत् शप्श्यनोर्नित्यं शप् श्यन् नावर्णात्परोऽयं शतृ
प्रत्ययवस्त्वदंतस्य नुम् शीनद्योः पचंती पचंति दीव्यत् दीव्यंति दिव्यंती धनुः धनुषी सांते ति
दीर्घः नुम्विसर्जनीयेति षः धनूंषि धनुषा धनुर्भ्यां ३ एवं चक्षुर्हविरादयः पयः पयसी पयां
सि पयसा पयोभ्यां ३ सुपुम् सुपुंसी सुपुमांसि अदः विभक्तिकार्ये उत्वमत्वे अमू अमूनि
शेषं पुंवत् इति हलंतानि क्लीबानि स्वरादिनिपातमव्ययं स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः
स्वर् अंतर् प्रातर् पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात्
पृथक् ह्यस् श्वस् दिवा रात्रौ सायं चिरं मनाक् ईषत् ऋते युगपत् आरात् पृथक् ह्य

© Dharmartha Trust J&K. Digitized by eGangotri

त् स्वधा दिवा रात्रौ सायं चिरं मनाक् ऋते युगपत् ईषत् जोषं तूष्णीं बहिस् अवस् समया
निकषा स्वयं वृथा नक्तं नञ् हेतौ इद्धा अद्धा सामि वत् ब्राह्मणवत् क्षत्रियवत् सनात
उपधा सनत् सनात् तिरस् अंतरा अंतरेण ज्योक् कं शं सहसा विना नाना स्वस्ति स्वाहा
स्वधा अलं वषट् श्रौषट् वौषट् अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या
मुधा पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकं प्रवाहिका आर्यहलं अभीक्ष्णं साकं
सार्द्धं नमस् हिरुक् धिक् अथ अम् आम् प्रताम् प्रशान् प्रतान् मा माङ् आकृतिग
णोयं च वा ह अह एव एवं नूनं शश्वत् युगपत् भूयस् कूपत् कुवित् नेत् चेत् चण् य
१८ त्र कच्चित् नह हंत माकिः माकिं नकिं माङ् नञ् यावत् तावत् त्वै द्वै न्वै रै श्रौषट् वौष
ट् स्वाहा स्वधा वषट् तुम् तथा हि खलु किल अथ सुष्ठु स्म आदह उपसर्गविभक्ति
स्वरप्रतिरूपकाश्च अवदत्तं अहंयुः अस्तिक्षीरा अ आ इ ई उ ऊ ए ऐ ओ औ पशु शुकं यथाक
थाच पाट् प्याट् अंग है हे भोः अये द्य विषु एकपदे युत् आतः। चादिरप्याकृतिगणः।
तद्धितश्चासर्वविभक्तिः। यस्मात्सर्वा विभक्तिर्नोत्पद्यते तद्धितांतः सोऽव्ययं स्यात् प
ठितगणे न कर्तव्यं तसिलादयः प्राक् पाशपः। शस्तसिः। प्राक् समासांतेभ्यः। अम् आम्
कृत्वोर्थाः। तसिवती नानाञाविति अतः कृत्वादि इति केचित् पचति कल्पं पचति रूपं कृ
न्मेजंतः। कृद्यो मांत एजंतश्च तदंतमव्ययम्। स्मारं स्मारं जीवसे पिबध्यै क्त्वा तोसुन् क
सुनः। एतदंतमव्ययं कृत्वा उदेतोः। विसृपः। अव्ययीभावश्च अधिहरि अव्ययादाप्
सुपः। अव्ययादिह निस्यापः। सुपश्च लुक् स्यात् तत्र शालायां आत्मा सदृशं त्रिषु
लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं। वष्टि भागुरि

© Dharmartha Trust J&K. Digitized by eGangotri

रिल्लोपमवाप्तो हृपसर्गयोः अयं चैव हृसंज्ञातो यथावाचानिन्त्रादि कुरु २ वगादृः अ
वगादृः चिधानं अविधानं हृष्यव्ययानि प्रथमावृत्तिसमाप्ता लट् लिट् लुट् लृट् लेट्
लोट् लङ् लिङ् लुङ् लृङ् एषु पंचमो लकारः छंदोमात्रगोचरः लः कर्मणि च भावे च
कर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्मणि च कर्त्तरि च स्युः अकर्मकेभ्यो भावे कर्त्तरि
च वर्त्तमाने लट् वर्त्तमानक्रियावृत्तेर्धातो लट् स्यात् अदावितो उच्चारणसामर्थ्या
ल्लस्य नेत्वं भूसत्तायां कर्त्तृविवक्षायां भूल इतिस्थिते तिपूतस् झि सिप्थस् थ मिप्वस्
मस् तातां झ थासाथां ध्वं इड्वहि महिङ् एतेष्टादश लादेशाः स्युः लः परस्मैप
दं पदं तङानावात्मनेपदं तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसं
ज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत उपदेशे यो ङित तदंतात् धातो ल
स्य स्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञित
श्च धातोरात्मनेपदं स्यात् कर्त्तृगामिनि क्रियाफले शेषात्कर्त्तरि परस्मैपदं आत्म
नेपदनिमित्तहीनात् धातोः कर्त्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्य
मोत्तमाः तिङ् उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विव
चनबहुवचनान्येकशः लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येक
मेकवचनादिसंज्ञानि स्युः युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङ्वा
च्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात् अस्म
लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् एषु पंचमो लकारः छंदोमात्रगोचरः लः क

© Dharmartha Trust J&K. Digitized by eGangotri

कर्म्मणि च भावे च कर्मकेभ्यः । कर्म्मणि कर्त्तरि च स्युरकर्मकेभ्यो भावे कर्त्तरि च वर्त्तमाने ल
ट् वर्त्तमानक्रियावृत्तेर्धातोर्लट् अपवित्तो उच्चारणसामर्थ्यात् लस्य नेएवं भूसत्तायां
वेत्ते विवादायां भूलृ इति स्थिते तिबादयः सु क्रिसिपुरुषस्य मिपूर्वः समलात् लोट् ञोमध्या
सार्थात् सिद्धमिति हिङ् एतेषामदग्लादेशाः स्युः । लः परस्मैपदं लादेशाः परस्मैपदसं
ज्ञाः । तङानवात्मनेपदं तङ् प्रत्याहारः शानच कानवौ चैगतत्संज्ञाः स्युः पूर्वसंज्ञापवा
दः अनुदात्तङित आत्मनेपदं अनुदात्तेतः ङपदेशे यो ङितः तदन्तात् च धातोः लस्य
स्थाने आत्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले स्वरितेतो ञितश्च
धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेप
१५ दनिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं स्यात् तिङ्स्त्रीणि त्रीणि प्रथममध्यमो
त्तमाः तिङ् उभयोः पदयोः त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः । तान्येकवचनद्विवच
नबहुवचनान्येकशः लब्धकप्रथमादिसंज्ञानि तिङः त्रीणि त्रीणि प्रत्येकमेकवच
नादिसंज्ञानि तिस्युः युष्मद्युपदे समानाधिकरणे स्थानिन्यपि मध्यमः तिङ्वाच्ये
कारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः अस्मद्युत्तमः तिङ्वा
च्यकारकवाचिन्यस्मदि प्रयुज्यमानेऽप्रयुज्यमाने चोत्तमः स्यात् शेषे प्रथमः म
ध्यमोत्तमयोरविषये प्रथमपुरुषः स्यात् भूत इति जाते तिङ् शित सार्वधातुकं ति
ङ् शित्श्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः । कर्त्तरि शप् कर्त्रर्थे सार्वधातुके धातोः श
प् स्यात् सार्वधातुकार्द्धधातुकयोः अनयोरिगन्तस्य गुणः अवादेशः भवति भव

© Dharmartha Trust J&K. Digitized by eGangotri

ति भवतः। झोन्तः। प्रत्ययावयवस्य झस्य अन्तादेशः। अतो गुणे भवन्ति भवसि भवथः भवथ अतो
दीर्घो यञि अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके भवामि भवावः भवामः स भवति तौ भवतः
ते भवन्ति त्वं भवसि युवां भवथः यूयं भवथ अहं भवामि आवां भवावः वयं भवामः दी
तूखे विभाषा दावदमान्त उपदेशे उपदेशे कादि खादि दिवान्त वर्ज्जे गदनदादेरन्यस्मिन्नुधा
तो वुपसर्गस्यान्निमि नाम्परस्य नेर्णत्वं वा स्यात् प्रणिभवति प्रनिभवति परोक्षे
